# Shri Bhavanandacharyakritam Shikshadashakam

# શ્રીભાવાનન્દાચાર્યકૃતં શિક્ષાદશકમ્

## Document Information

Text title : Shri Bhavanandacharyakritam Shikshadashakam

File name : shikShAdashakam.itx

Category : misc, rAmAnanda, advice, upadesha, dashaka

Location : doc_z_misc_general

Author : bhAvAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampraday Dig-Darshan

Latest update : November 11, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 11, 2023

*sanskritdocuments.org*

# શ્રીભાવાનન્દાચાર્યકૃતં શિક્ષાદશકમ્

રામાનન્દં ગુરું નત્ત્વા હ્યાનન્દભાષ્યકારકમ્ ।
શિક્ષાયા દશકં કુર્વે સદાऽऽનન્દપ્રદાયકમ્ ॥ ૧॥

નિત્યં વિહાય નિદ્રાં હિ મુહૂર્ત્તે બ્રહ્મસંજ્ઞકે ।
ચિન્ત્યતાં બ્રહ્મસંજ્ઞશ્ચ સીતાનાથઃ પરાત્પરઃ ॥ ૨॥

હન્તું હિ લોકદુઃખારિં હર્ત્તું ચાજ્ઞાનજં તમઃ ।
વીક્ષિતું સત્યપન્થાનમુત્થાનં સુવિધીયતામ્ ॥ ૩॥

સાહાય્યં ક્રિયતાં નિત્યં દીનાનામિષ્ટસિદ્ધયે ।
દુઃખં ચ દુઃખિનાં દૃષ્ટ્વા દુઃખિના સ્વેન ભૂયતામ્ ॥ ૪॥

મનસા વચસા ચાથ કર્મણા ચર્યતાં તથા ।
સદયઃ સ્યાત્ સદાચારી સત્યભાષી યથા જનઃ ॥ ૫॥

લોભક્રોધમદાદીંશ્ચ મહાશત્રૂન્ સુહન્યતામ્ ।
એતેષાં બલવત્ત્વે તુ શ્રિયતાં સાધુસઙ્ગતિઃ ॥ ૬॥

સદ્વિચારસદાચારાવુપાદેયૌ સદા ભુવિ ।
તદર્થં માનવૈર્નિત્યં સત્સેવા સુવિધીયતામ્ ॥ ૭॥

નિઃશ્રેયસસ્ય સન્માર્ગો રામભક્તિર્વિનિશ્ચિતા ।
તસ્યાશ્ચાલમ્બનં કાર્યં સર્વં ત્યક્ત્વા મુમુક્ષુભિઃ ॥ ૮॥

સ્વસમઃ ક્રિયતાં લોકો ગુણિના સુખિના તથા ।
ઉભાવપ્યધિકાં શોભાં પ્રાપ્નુયાતાં તથા ભુવિ ॥ ૯॥

આલસ્યં વર્જયિત્વાऽત્ર સત્કર્મ ક્રિયતાં જનૈઃ ।
શ્રીરામાયાર્પિતં કર્મ શ્રેષ્ઠં નૈષ્કર્મ્યતો મતમ્ ॥ ૧૦॥

આત્માનાત્મદ્વયજ્ઞાનમર્જ્યતાં સદ્ગુરોઃ સદા ।
ગુરું રામં ચ સંસેવ્ય તરણીયો ભવાર્ણવઃ ॥ ૧૧॥

શિક્ષાયા દશકં ચેદં રામાનન્દાર્યશિક્ષિતમ્ ।
ભવાબ્ધિતારકં ભૂયાદ્ ભાવાનન્દાર્યનિર્મિતમ્ ॥ ૧૨॥

ઇતિ શ્રીભાવાનન્દાચાર્યકૃતં શિક્ષાદશકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Bhavanandacharyakritam Shikshadashakam*

pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*